# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा -दिसम्बर, २०१८

| | | |
|---|---|---|
| कक्षा -शास्त्रीतृतीयवर्षम् (SEM-5) | प्रश्नपत्रम् – ६ | गुणा: - ७० |
| विषय: - फलितज्यौतिषम् | (C.C.- 3.5.10. Old & New ) | |
| दिनाङ्कः - १०/१२/२०१८ | सरलजन्मपत्रीविज्ञानम् । | समय: -१०.०० त: ०१.०० |

**प्रथमान्विति:**

**प्रश्न: १ अधोलिखितेषु कयोश्चिद् द्वयोः सान्वयं व्याख्यां कुरुत । ( १० )**

(क) शैल: प्रांशु: पाणर्यस्य तले विस्फुट: स्फुरति ।
स पुमान् पापो राज्यं लभते निजभुजसहायोऽपि ॥

(ख) मूलेङ्गुष्ठस्य नृणां स्थूला रेखा भवति यावन्त्य: ।
तावन्त: पुत्रा: स्यु: सूक्ष्माभि: पुत्रकास्ताभि: ॥

(ग) दारिद्रदु:खभाजनमेकोनात्रिंशता सदा दशनै: ।
उर्ध्वमधस्तांत्तरपि विहीन संख्येर्नरो दु:खी ॥

**प्रश्न: २ अधोलिखितयोरेकतरस्योपरिनिबन्धं लिखत । ( १० )**

(१) चिह्नविचार: ।

(२) मुख्याङ्गलक्षणविचार: ।

**द्वितीयान्विति:**

**प्रश्न: ३ निम्नलिखितेषु कश्चिद् द्वयोः सान्वयं व्याख्यां कुरुत । ( १० )**

(१) अङ्ग यद्यपिपुंसास्त्रीणां वा पिशितविरहितं सूक्ष्मम् ।
पुरुषं शिरावनद्धं तत्तदनिष्टं परं ज्ञेयम् ॥

(२) शुभलक्षणमङ्गेभ्य: सौ-दर्पणाधिकं मुखं यस्य ।
स्वज्ञाति प्रधान्यं प्राप्नोति स धान्यधनवत्त्वम् ॥

(३) गन्धो भुवि मनुजानां प्रजापते नासिकेन्द्रियग्राह्य: ।
श्वासरवेदादिभवो ज्ञेय: स शुभाशुभो द्विविध: ॥

**प्रश्न: ४ अधोलिखितयोरेकतरस्योपरि निबन्धं लिखत । ( १० )**

(१) स्त्रीगतिविचार: ।

(२) अङ्गप्रमाणविचार: ।

## तृतीयान्विति:

**प्रश्न: ५ अधोलिखितेषु कयोश्चिद् द्वयो: सान्वयं व्याख्यां कुरुत ।** **( १० )**

(१) तिथिवारर्क्षयोगानां योगोनामक्षरैर्युत: ।
सप्तभक्ताऽवशेषेण समेकन्याऽसमेसुत: ॥

(२) केन्द्रत्रिकोणेषु शुभान्वितेषु पापेषु केन्द्राष्टमवर्जितेषु ।
सर्वार्थसिद्धिं प्रवेदन्नराणां विपर्ययस्थेषु विपर्यय: स्यात् ॥

(३) सौम्येविलग्ने यदि वाऽस्यवर्गे शीर्षोदये सिद्धिमुपैतिकार्यम् ।
सतो विपर्यस्तमसिद्धिहेतु: कृच्छ्रेण संसिद्धिकरं विमिश्रम् ॥

**प्रश्न: ६ अधोलिखितयोरेकतरस्योपरि निबन्धं लिखत ।** **( १० )**

(१) गमनागमनविचार: ।

(२) नष्टवस्तुलाभविचार: ।

## चतुर्थान्विति:

**प्रश्न: ७ अधोलिखितेषु केषाञ्चित्दशप्रश्नानामुत्तरं लिखत ।** **( १० )**

(१) मुख्याङ्गानां संख्या लिखत ।

(२) यदा ललाटे पञ्चरेखा: स्युस्तदा नृणां आयुर्मानं लिखत ।

(३) यदा ललाटे रेखा न स्यात्तदा आयुर्मानं लिखत ।

(४) स्त्रिय: कतिप्रकारका: भवन्ति ?

(५) कति आया: सन्ति ?

(६) ध्वजायस्य स्वामी क: ?

(७) धूम्रायस्य स्वामी क: ?

(८) प्रश्नकाले यदा स्वराय: स्यात्तदा कार्याकार्यप्रश्ने किं फलं भवति ?

(९) काकपदचिह्नस्य फलं लिखत ।

(१०) हस्ते मीनरेखाया: फलं किम् ?

(११) रोमरहितपुरुषस्य फलं लिखत ।

(१२) पञ्चोपाङ्गानां नामानि लिखत ।

(१३) बिम्बस्य सदृश: अधरस्य फलं लिखत ।

(१४) पाटलाधरस्य फलं लिखत ।

(१५) जनकवचनानुरूपं कन्याया: फलं लिखत ।

--००--